Homas
the spiritual way to success
K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अथ संक्षोभणमन्त्रः —

अगस्त्य ऋषिः । पङ्क्तिः छन्दः । संक्षोभिणी देवता । क्षं बीजम् । ह्रीं शक्तिः । क्षां इत्यादिना षडङ्गम् ॥

पर्वा पञ्चमुखारूढा परिघासिकराम्बुजा ।
सर्वारिहृदयक्षोभकारिणी पातु सर्वदा ॥

क्षां ओं नमो भगवति अपवादहरे महाक्रूरे सर्वशत्रुविमर्दिनि देवदत्तमनः-क्षोभं कुरु कुरु स्वाहा ॥ अक्षरसहस्रजपः ॥

मन्त्रावसानके वैरिनाममिश्रितपल्लवम् ।
सहस्रं प्रजपेन्मन्त्री भ्रष्टचित्तो भवेद्रिपुः ॥

शताभिमन्त्रितं भस्म निखनेदष्टदिक्षु सः ।
भवनं परितो मन्त्री रक्षणाय स्वकीयकम् ॥

शत्रुतस्करपीडा च जन्तुभूतादिपीडनम् ।
स्वप्नकालेऽपि नैवास्य वरेण्ये नात्र संशयः ॥

तत्र पल्लवं मन्त्रान्ते हुं फडादि तत्तत्क्रियोचितपदयोजनम् ॥ वैरि-नाममिश्रितमिति मच्छत्रुमनःक्षोभं कुर्वित्यर्थः ॥